# संक्षिप्तप्रश्नावली

# श्रीमद्भगवद्गीता

**1. श्रीमद्भगवद्गीता किम् प्रकारकं ग्रन्थम् ?**
श्रीमद्भगवद्गीता उपनिषदग्रन्थम् तथा दार्शनिकग्रन्थम् ।

**2. श्रीमद्भगवद्गीता शव्दस्य को2थः ?**

श्री शव्द कल्याणवाचकः। मतुप् प्रत्यययुक्तत्वात् श्री +मतुप्( ङीप्) –श्रीमती तथा कल्याणमयी। भगवतसम्वन्धीया कथा भागवती । गै +क्त +आ-गीता । गीता माधुर्येण युक्ता । गीता उपनिषदसारभूता । उपनिषत् (उप-नि-सद्+क्विप्) स्त्रीलिङ्गशव्दः । अथ निश्चयाथः भवति श्रीमयी भागवती कथा या गीता भवति सा श्रीमद्भगवद्गीता ।

3. **श्रीमद्भगवद्गीतायाः वक्ता श्रोता च कः ?**
श्रीमद्भगवद्गीतायाः वक्ता श्रीकृष्णः श्रोता च अर्जुनः ।

4. **श्रीमद्भगवद्गीतायाः उत्सः कः ?**
श्रीमद्भगवद्गीतायाः उत्सः महाकविना वेदव्यासेन विरचितेन महाभारतस्य भीष्मपर्वणि पञ्चविंशतितम अध्यायात् द्वाचत्वारिंशत्तम अध्याय पर्यन्तं श्लोकसमष्टिः

5. **सप्तशतिसंहिता का ? किमर्थं सप्तशतिसंहिता उक्तम् ?**
श्रीमद्भगवद्गीता सप्तशतिसंहिता । श्रीमद्भगवद्गीतायाः सप्तशत श्लोकाः सन्ति । अतः श्रीमद्भगवद्गीता सप्तशतिसंहिता नाम्ना परिचिता ।

**6. केन बिरचिता श्रीमद्भगवद्गीता ?**
महाकबिना कृष्णद्वैपायणबेदब्यासेन बिरचिता श्रीमद्भगवद्गीता ।

7. **श्रीमद्भगवद्गीतायाः कति अघ्यायाः सन्ति ? प्रति अध्यायः किम् नाम्ना अभिहिता ? प्रथमम् अघ्यायम् शेषम् अध्यायम् च नामं किम् ?**
श्रीमद्भगवद्गीतायाः अष्टादश अघ्यायाः सन्ति । प्रति अध्यायः योगः इति नाम्ना अभिहिता । प्रथमम् अघ्यायम् शेषम् अध्यायम् च नामं यथाक्रमम् अर्जुनविषादयोगः मोक्षयोगः च ।

8. **श्रीमद्भगवद्गीतायाः चतुर्थ अध्यायस्य नाम किम् ? वेदव्यासेन अस्य अध्यायस्य नामपरिचयं कथं प्रदत्त ?**
श्रीमद्भगवद्गीतायाः चतुर्थ अध्यायस्य नाम ज्ञानयोगः । वेदव्यासेन अस्य अध्यायस्य नामपरिचये भणितम्—इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु व्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानयोगो नाम चतुर्थो2ध्योयः ।

**9. ज्ञानयोगः शव्दस्य को2र्थः ?**

युज्यते अनेन इति योगः । युज्+ घञ् । इहलोके जीवः पुनः पुनः जन्ममरणचक्रे आवर्तितः सन् दुःखभाक् भवति । किन्तु आत्मज्ञानम् अवलम्व्य परमात्मना सह मनुष्याणां योगः संयुक्तिकरणमेव सत्यम् । परमात्मना सह जीवस्य योगः ज्ञानमेव यत्र अवलम्वनम् सः ज्ञानयोगः ।

**10. श्रीमद्भगवद्गीतायाः कति श्लोकाः सन्ति ? अस्या चतुर्थे अध्याये कति श्लोकाः सन्ति**

श्रीमद्भगवद्गीतायाः सप्तशत श्लोकाः सन्ति । अस्या चतुर्थे अध्याये द्वाचत्वारिंशत् श्लोकाः सन्ति ।

.............................